आश्वलायन विवाह मन्त्राः

१.४.४. अग्न आयूंषि पवस आ सुवोर्जमिषं च नः । आ रे बाधस्व दुच्छुताम् ॥
अग्निऋषिः पवमानः पाञ्चजन्य पुरोहितः । तमीमहे महागयम् ॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ॥

१.४.७. त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बिर्भषि ।
अञ्जन्ति मित्रं सुधितं न गोभिर्यद्दमपती समनसा कृणोषि ॥

१.५.५. ऋतमग्रे प्रथमं जज्ञे ऋते सत्यं प्रतिष्ठितम् ।
यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत् सत्यं तद् दृश्यताम् ॥

१.७.३. गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥

१.७.६. अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहम् ।
द्योरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि विवहावहै ।
प्रजां प्रजनयावहै संप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतम् ॥

१.७.७. आरोहाश्मेव त्वं स्थिरा भव ।
सहस्व पृतनायतोऽभितिष्ठ पृतन्यतः ॥

१.७.८. इयं नार्युपब्रूतेऽग्नौ लाजानावपन्तिका ।
दीर्घायुरस्तु मे पतिर्जीवातु शरदश्शतं ॥

१.७.१३. अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवोऽर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ॥
वरुणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवोऽर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ॥
पूषणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवोऽर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ॥

१.७.१७. प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥

१.७.१९. इष एकपद्यूर्जे द्विपदी रायस्पोषाय त्रिपदी मायोभव्याय चतुष्पदी प्रजाभ्यः
पञ्चपद्यृतुभ्यः षट्पदी सखा सप्तपदी भव सा मामनुव्रता भव । पुत्रान्विन्दावहै
बहूँस्ते सन्तु जरदष्टयः ॥

१.७.२२. ध्रुवं पश्यामि प्रजां विन्देय ॥ जीवपत्नीं प्रजां विन्देय ॥

१.८.१. पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्रवहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥
१.८.२. अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहाम ये असन्शेवाः शिवान् वयमुत्तरेमभि वाजान् ॥
१.८.४. जीवां रुदन्ती विमयन्तो अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वज ॥
१.८.६. मा विदन्परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥
१.८.७. सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यामस्यै दत्वायाथास्तं विपरेतन ॥
१.८.८. इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः ॥
१.८.९. आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥
अघोरचक्षुरपतिघ्न्ये धि शिवा पशुभ्यः सुमना सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥
इमां त्वमिन्द्र मीढ्वस्सुपुत्रां सुभगां कुरु ।
दशाभ्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥